## नवदशः पाठः

# अन्नं वै ब्रह्म

**वैदिकग्रन्थेषु उपनिषदाम् सर्वोच्चं स्थानमस्ति। उपनिषत्सु वेदानां व्याख्यानं वर्तते। ईशादिप्रमुख-नवोपनिषत्सु 'तैत्तिरीयोपनिषदः' अयमंशः ग्रहीतः। अस्मिन् अंशे अन्नम् ''ब्रह्म'' इति उपदिष्टम्।**

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता। स य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

अन्नं न निन्द्यात्। तद् व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

अन्नं न परिचक्षीत। तद् व्रतम्। आपो वा अन्नम्। ज्योतिरन्नादम्। अप्सु ज्योतिः प्रतिष्ठितम्। ज्योतिष्यापः प्रतिष्ठिताः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

अन्नं बहु कुर्वीत। तद् व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति महान् भवति। प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

न कंचन वसतौ प्रत्याचक्षीत। तद् व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। आराध्यास्मा अन्नमित्याचक्षते। एतद्वै मुखतोऽन्नराद्धम्। मुखतोऽस्मा अन्नराध्यते। एतद्वै मध्यतोऽन्नराद्धं मध्यतोऽस्मा अन्नराध्यत। एतद्वा अन्ततोऽन्नराद्धम्। अन्ततोऽस्मा अन्नराध्यते। य एवं वेद।

### शब्दार्थः

| | | |
|---|---|---|
| व्यजनात् | – | निश्चयेन ज्ञातवान् (निश्चय ही जाना) |
| अन्नादः | – | अन्नस्य भोक्ता (अन्न खाने वाला) |
| न परिचक्षीत | – | न निन्दनीयम् (अनिन्दित) |
| न प्रत्याचक्षीत् | – | प्रतिकूलोत्तरं न वक्तव्यम् (विपरीत नहीं बोलना चाहिए) |
| राद्धम् | – | सिद्धम् (आटा को गूंथा गया) |
| प्रतिष्ठितम् | – | अवस्थितः (स्थित) |

| | | |
|---|---|---|
| कुर्वीत | – | कर्त्तव्यम् (करना चाहिए) |
| कीर्त्या | – | यशसा (यश के द्वारा) |
| आपः | – | जलम् |
| विधया | – | प्रकारेण (प्रकार से) |

## अभ्यासः

1. **एकपदेन उत्तरत–**

क) भूतानि कस्मात् जायन्ते?

ख) अन्नवान् कः भवति?

ग) आपः कुत्र प्रतिष्ठितः?

घ) आकाशे का प्रतिष्ठिता?

ङ) यया कया च विधया किं प्राप्नुयात्?

2. **एकवाक्येन उत्तरत –**

क) किं व्यजनात्?

ख) परमे व्योमन् का प्रतिष्ठिता?

ग) अन्नवान् कथं महान् भवति?

घ) कं न प्रत्याचक्षीत्?

ङ) अन्नं कथं राध्यते?

3. **रिक्तस्थानानि पूरयत–**

क. आनन्देन ......................जीवन्ति।

ख. .......................शरीरं प्रतिष्ठितम्।

ग. अन्नं .............कुर्वीत।

घ. पृथिव्यामाकाशः..........................।

ङ. अप्सु ..........................प्रतिष्ठितम्।

**4. यथायोग्यं योजयत –**

| | **अ** | **ब** |
|---|---|---|
| क) | अन्नं न | महान् |
| ख) | कीर्त्या | ब्रह्म |
| ग) | आनन्दः | विद्या |
| घ) | भार्गवी | अन्नादः |
| ङ) | अन्नवान् | निन्द्यात् |

**5. शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं 'न' इति लिखत –**

यथा–

अन्नं बहु कुर्वीत [आम्]

अन्नं निन्द्यात् [न]

क) आनन्दः ब्रह्म अस्ति। [ ]

ख) आनन्देन जातानि न जीवन्ति। [ ]

ग) शरीरे प्राणः प्रतिष्ठितः। [ ]

घ) अन्नं परिचक्षीत। [ ]

ङ) अन्नवानन्नादो भवति। [ ]

च) आकाशे पृथिवी प्रतिष्ठिता। [ ]

**6. निम्नलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत–**

| | **शब्दः** | **मूलशब्दः** | **विभक्तिः** | **वचनम्** |
|---|---|---|---|---|
| यथा– | कीर्त्या | कीर्ति | तृतीया | एकवचनम् |
| क) | आनन्देन | .............. | .............. | .............. |
| ख) | प्रजया | .............. | .............. | .............. |

ग)   प्राणे   ..............   ..............   ..............

घ)   अप्सु   ..............   ..............   ..............

ङ)   अन्नात्   ..............   ..............   ..............

च)   पृथिव्याम्   ..............   ..............   ..............

**7. निम्नलिखितशब्दानां सन्धिविच्छेदं कृत्वा नामानि लिखत –**

क) ब्रह्मेति

ख) सैषा

ग) खल्विमानि

घ) ज्योतिष्यापः

ङ) बह्वन्नम्

च) एतदन्नम्

**योग्यताविस्तारः –**

- उपनिषदां नामानि लिखत–
- कठोपनिषदः अध्ययनं कुरुत–